योगवासिष्ठः/प्रकरणम् २ (मुमुक्षुव्यवहारप्रकरणम्)/सर्गः ०७

अज्ञातलेखकः

श्रीवसिष्ठ उवाच ।

प्राप्य व्याधिविनिर्मुक्तं देहमल्पाधिवेदनम् ।

तथात्मनि समादध्याद्यथा भूयो न जायते ।। १

दैवं पुरुषकारेण यो निवर्तितुमिच्छति ।

इह वामुत्र जगति स संपूर्णाभिवाञ्छितः ।। २

ये समुद्योगमुत्सृज्य स्थिता दैवपरायणाः ।

ते धर्ममर्थं कामं च नाशयन्त्यात्मविद्विषः ।। ३

संवित्स्पन्दो मनःस्पन्द ऐन्द्रियस्पन्द एव च ।

एतानि पुरुषार्थस्य रूपाण्येभ्यः फलोदयः ।। ४

यथा संवेदनं चेतस्तथा तत्स्पन्दमृच्छति ।

तथैव कायश्चलति तथैव फलभोक्तृता ।। ५

आबालमेतत्संसिद्धं यत्र यत्र यथा यथा ।

दैवं तु न क्वचिद्दृष्टमतो जगति पौरुषम् ।। ६

पुरुषार्थेन देवानां गुरुरेव बृहस्पतिः ।

शुक्रो दैत्येन्द्रगुरुतां पुरुषार्थेन चास्थितः ।। ७

दैन्यदारिद्र्यदुःखार्ता अपि साधो नरोत्तमाः ।

पौरुषेणैव यत्नेन याता देवेन्द्रतुल्यताम् ।। ८

महान्तो विभवास्वादैर्नानाश्चर्यसमाश्रयाः ।

पौरुषेणैव दोषेण नरकातिथितां गताः ।। ९

भावाभावसहस्रेषु दशासु विविधासु च ।

स्वपौरुषवशादेव निवृत्ता भूतजातयः ।। १०

शास्त्रतो गुरुतश्चैव स्वतश्चेति त्रिसिद्धयः ।

सर्वत्र पुरुषार्थस्य न दैवस्य कदाचन ।। ११

अशुभेषु समाविष्टं शुभेष्वेवावतारयेत् ।

प्रयत्नाच्चित्तमित्येष सर्वशास्त्रार्थसंग्रहः ।। १२

यच्छ्रेयो यदतुच्छं च यदपायविवर्जितम् ।

तत्तदाचर यत्नेन पुत्रेति गुरवः स्थिताः ।। १३

यथा यथा प्रयत्नो मे फलमाशु तथा तथा ।

इत्यहं पौरुषादेव फलभाङ् न तु दैवतः ।। १४

पौरुषाद्दृश्यते सिद्धिः पौरुषाद्धीमतां क्रमः ।

दैवमाश्वासनामात्रं दुःखे पेलवबुद्धिषु ।। १५

प्रत्यक्षप्रमुखैर्नित्यं प्रमाणैः पौरुषक्रमः ।

फलितो दृश्यते लोके देशान्तरगमादिकः ।। १६

भोक्ता तृप्यति नाभोक्ता गन्ता गच्छति नागतिः ।

वक्ता वक्ति न चावक्ता पौरुषं सफलं नृणाम् ।। १७

पौरुषेण दुरन्तेभ्यः संकटेभ्यः सुबुद्धयः ।

समुत्तरन्त्ययत्नेन न तु मोघतयानया ।। १८

यो यो यथा प्रयतते स स तत्तत्फलैकभाक् ।

न तु तूष्णीं स्थितेनेह केनचित्प्राप्यते फलम् ।। १९

शुभेन पुरुषार्थेन शुभमासाद्यते फलम् ।

अशुभेनाशुभं राम यथेच्छसि तथा कुरु ।। २०

पुरुषार्थात्फलप्राप्तिर्देशकालवशादिह ।

प्राप्ता चिरेण शीघ्रं वा यासौ दैवमिति स्मृता ।। २१

न दैवं दृश्यते दृष्ट्या न च लोकान्तरे स्थितम् ।

उक्तं दैवाभिधानेन स्वर्लोके कर्मणः फलम् ।। २२

पुरुषो जायते लोके वर्धते जीर्यते पुनः ।

न तत्र दृश्यते दैवं जरायौवनबाल्यवत् ।। २३

अर्थप्रापककार्यैकप्रयत्नपरता बुधैः ।

प्रोक्ता पौरुषशब्देन सर्वमासाद्यतेऽनया ।। २४

देशाद्देशान्तरप्राप्तिर्हस्तस्य द्रव्यधारणम् ।

व्यापारश्च तथाङ्गानां पौरुषेण न दैवतः ।। २५

अनर्थप्राप्तिकार्यैकप्रयत्नपरता तु या ।

प्रोक्ता प्रोन्मत्तचेष्टेति न किंचित्प्राप्यतेऽनया ।। २६

क्रियया स्पन्दधर्मिण्या स्वार्थसाधकता स्वयम् ।

साधुसंगमसच्छास्त्रतीक्ष्णयोन्नीयते धिया ।। २७

अनन्तसमतानन्दं परमार्थं स्वकं विदुः ।

स येभ्यः प्राप्यते यत्नात्सेव्यास्ते शास्त्रसाधवः ।।२८

सच्छास्त्रादिगुणो मत्या सच्छास्त्रादिगुणान्मतिः ।

विवर्धेते मिथोऽभ्यासात्सरोजाविव कालतः ।। २९

आबाल्यादलमभ्यस्तैः शास्त्रसत्संगमादिभिः ।

गुणैः पुरुषयत्नेन स्वार्थः संपद्यते हितः ।। ३०

पौरुषेण जिता दैत्याः स्थापिता भुवनक्रियाः ।

रचितानि जगन्तीह विष्णुना न च दैवतः ।। ३१

जगति पुरुषकारकारणेऽस्मिन्

कुरु रघुनाथ चिरं तथा प्रयत्नम् ।

व्रजसि तरुसरीसृपाभिधानां

सुभग यथा न दशामशङ्क एव ।। ३२

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मुमुक्षुव्यवहारप्रकरणे पौरुषप्राधान्यसमर्थनं नाम सप्तमः सर्गः ।। ७ ।।